09-09-2020

संस्कृत सामान्यम्। उपशास्त्री I

अनिवार्यपत्रम् धातु रूपाणि

√घ्रा - (जिघ्र) = सूँघना

लट् लकार (वर्तमान काल) . परस्मैपदम्।

| पुरुष | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पु० | जिघ्रति | जिघ्रतः | जिघ्रन्ति |
| मध्यम पु० | जिघ्रसि | जिघ्रथः | जिघ्रथ |
| उत्तम पु० | जिघ्रामि | जिघ्रावः | जिघ्रामः |

लोट् लकार (अनुज्ञा, आज्ञार्थक)

| पुरुष | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पु० | जिघ्रतु | जिघ्रताम् | जिघ्रन्तु |
| मध्यम पु० | जिघ्र | जिघ्रतम् | जिघ्रत |
| उत्तम पु० | जिघ्राणि | जिघ्राव | जिघ्राम |

लङ् लकार (अनद्यतन भूतकाल)

| पुरुष | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पु० | अजिघ्रत् | अजिघ्रताम् | अजिघ्रन् |
| मध्यम पु० | अजिघ्रः | अजिघ्रतम् | अजिघ्रत |
| उत्तम पु० | अजिघ्रम् | अजिघ्राव | अजिघ्राम |

विधिलिङ्गम् (चाहिए)

| पुरुष | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पु० | जिघ्रेत् | जिघ्रेताम् | जिघ्रेयुः |
| मध्यम पु० | जिघ्रेः | जिघ्रेतम् | जिघ्रेत |
| उत्तम पु० | जिघ्रेयम् | जिघ्रेव | जिघ्रेम |

लृट् लकार (भविष्यत् काल)

| पुरुष | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पु० | घ्रास्यति | घ्रास्यतः | घ्रास्यन्ति |
| मध्यम पु० | घ्रास्यसि | घ्रास्यथः | घ्रास्यथ |
| उत्तम पु० | घ्रास्यामि | घ्रास्यावः | घ्रास्यामः |

09-09-2020

डॉ० निर्मल कुमार झा (स० प्राचार्य)।
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ।

09-09-2020

"संस्कृत साहित्यम्" । शास्त्री

"छन्दविचारः" । 3.

यतिलक्षणम् → "यतिर्विच्छेदसंज्ञिता ।"

यतिः = यति शब्दः, यति संज्ञा वा ।

विच्छेदः संज्ञी बोध्यो यस्याः सा ।

तात्पर्यः अस्ति - विच्छेदस्य 'यति' संज्ञा भवति ।

विच्छेदः विराम संज्ञकः अपि ।

विराम को यति कहते हैं। श्लोक/पद्यादि को पढ़ते समय मधुरता (माधुर्य) लाने के लिए जहाँ रुका जाता है, उस स्थान पर यति (विराम) किया जाता है।

विविध छन्दों के जो लक्षण आचार्यों ने बताया है, उस लक्षण में ही यति स्थान का निर्देश भी किया गया है। लक्षण में तृतीयान्त पद यति का बोधक होता है।

यथा → 'शार्दूलविक्रीडित' छन्द के लक्षण से समझें →

"सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्।"

इस लक्षण में सूर्याश्वैः तृतीयान्त पद है जो लाक्षणिक है। सूर्य के 12 नाम हैं → द्वादशादित्याः ।

अश्वैः - सूर्य के रथ में 7 घोड़े हैं । अतएव इस छन्द के प्रत्येक पाद में सातवें तथा बारहवें अक्षर पर विराम करना चाहिए।

इसके अतिरिक्त सामान्य नियम है कि श्लोकार्धे तथा श्लोक समाप्ति पर यति (विराम) करना चाहिए। आचार्य भरत यति के नियम का पालन करना अनिवार्य नहीं मानते हैं तथापि यति-नियम-पालन से श्लोक में संगीतात्मकता तथा मधुरता आती है इसलिए यति करना चाहिए।

शार्दूलविक्रीडित छन्द का उदाहरण देखें →

"या कुन्देन्दुतुषार, हारधवला, या शुभ्रवस्त्रावृता,
या वीणावरदण्ड, मण्डितकरा, या श्वेतपद्मासना ।

2 यति स्थान।

09.09.2020

डॉ० निर्मल कुमार झा (स० प्राचार्य)

रा० उ० सं० महावि० सुखसेना, पूर्णियाँ।

09-09-2020

संस्कृतसामान्यम् । उपशास्त्री ॥ वार्षिकपरीक्षायाः प्रश्नपत्रस्वरूपम् । 2019-20

अनिवार्यपत्रम् ।

1. निम्नांकितेषु वाक्येषु कस्य सूत्रस्य (विभक्त्यर्थप्रकरणस्य) प्रयोगः अभवत्? चिह्नांकितेषु पदेषु?
अति देवान् कृष्णः। मासं पठितः नायातः। मासेन व्याकरणम् अपठत्। गुरुः शिष्यान् सन्मार्गमभिनिविशते।
रामेण रावणः हतः। वेगेन धावति। धनेन हीनः ब्राह्मणः। जटाभिः तापसः। धनेन अभिमानः वर्धते। सः शरीरेण वक्रः अस्ति। अग्नये स्वाहा। मुनित्रयं नमस्कुरुत।
आभूषणाय स्वर्णमस्ति। सर्पाय दण्डः। हरये रोचते भक्तिः। पदाय स्पृहयन्ति नेतारः। देवदत्तः मह्यं शतं धारयति। नाहं त्वां तृणाय तृणं वा मन्ये। अहं तुभ्यं सुखमिच्छामि। माता बालकाय मोदकं ददाति। सः फलेभ्यः उद्यानं गच्छति।

2. निम्नांकितानां सूत्राणां उदाहरणसहितं व्याख्या कार्या।
उक्ते कर्मणि प्रथमा। अभिधेयमात्रे प्रथमा। कर्मप्रवचनीयाः। विभाषा दिवः करणम्। अनुक्ते कर्तरि तृतीया। अपवर्गे तृतीया। कालाध्वनोरत्यन्तसंयोगे। प्रकृत्यादिभ्यः उपसंख्यानम्। येनाङ्गविकारः। इत्थंभूतलक्षणे उपलक्षणे वा। हेतौ। पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम्। धारेरुत्तमर्णः। स्पृहेरीप्सितः। रुच्यर्थानां प्रीयमाणः।

3. अपठितगद्यांशस्य हिन्दीभाषायां रूपान्तरणं कुरुत।
जगति सर्वेषु देशेषु अधुना मुद्रा एव विनिमयस्य साधनरूपेण प्रसिद्धा। पुरा यदा मुद्रा नासीत्तदा वस्तूनां विनिमयेनैव लोकाः स्वावश्यकतां पूरयन्ति स्म। अन्नैः वस्त्राणि, फलैः शाकैश्च अन्नानि विनिमयन्ते। सर्वे लोकाः स्वनिर्मितानि वस्तूनि शिरसि निधाय विनिमयार्थं भ्रमन्ति स्म। इमां विसंगतिं दूरीकर्तुम् केचित् अर्थशास्त्रिणः मुद्रामाविष्कृतवन्तः।

शिष्टं अपरे दद्युः।

[signature] 09-09-2020

डॉ० निर्मल कुमार झा (सं० प्राचार्य)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ।